हवन गर्नेले तीन दिन सप्तमी, अष्टमी, नवमी बेलुका पनि हवन गर्ने चलन छ । नव पत्रिका नमिलेमा जतिको नमिलेको छ सो को प्रतिनिधि सिंगो सुपारी राखी पूजा गर्नु पर्दछ ।

महाअष्टमी

महाअष्टमीको दिन विहानको पूजा पाठ होम आदि समाप्त गर्ने त्यसपछि दिनमा भोजन नगर्ने भगवतीहरूको मन्दिरमा गई दर्शन गर्ने वलि दिने चलन छ त्यसमा ब्राह्मणले त वलि दिनु राम्रो होइन भन्ने छ -

ब्राह्मणेन सदादेयं कूष्माण्डं वलि कर्मणि ।
श्रीफलं वा सुराधीश छेदं नैवतु कारयेत् ।।

ब्राह्मणले बलिको बदला कुभिण्डो अथवा बेलको फल चढाउनु मात्र छेदन नगर्नू ।

छागा भावेतु कूष्माण्डं श्रीफलं वा मनोहरम् ।
वस्त्र संवेष्टितं कृत्वा छेदयेच्छुरिकादिना ।।

रूद्रयामलमा यस्तो वाक्य हुनाले क्षेत्रियादिले पनि कुभिन्डो अथवा बेल फलको बलि दिनु छेदन पनि गर्नु बोकाको बलि नदिए पनि हुन्छ ।

महाअष्टमीको दिन बेलुका शुद्ध भइ दशैं कोठामा गई आसनमा बसी आचमन गर्नु र कर्म पात्रोको कुश तिल जल लिई बेलुका विशेष पूजा गर्न सम्पूर्ण सौभाग्य आदि तयार पारेका सामग्री र आफूलाई अपवित्रः पवित्रोवा .... मन्त्रले सेचन गरी शुद्ध पार्ने अनि कुश तिल जल लिएर संकल्प माथि दिए अनुसार ममसम्म भने पछि महाष्ठम्यां दुर्भिक्ष दुःख निवृत्ति परमानन्द परमपद गमन दशाश्वमेध फल ध्वज माला कुल विमान बरारोहणोत्तर ब्रह्मलोक गमनपूर्वक शाश्वत कालावच्छिन्न हर्ष विजय कामः मनोमिलषितेच्छादिप्राप्त्यर्थं विशेष रूपेण देव्या पूजां हवनं च अहं करिष्ये ।

ध्यान गर्ने

फूल अक्षता हातमा लिएर हात जोडेर तलको मन्त्रले प्रार्थना गर्ने -

जटाजूट समायुक्तां मूर्द्धेन्दुकृत शेखराम ।
लोचनत्रयसम्पन्नां पद्मेन्दु सदृशाननाम् ।।
अतसी पुष्पसंकाशां सुप्रतिष्ठां सुलोचनाम् ।
नवयौवनासम्पन्नां महिषासुरमर्दिनीम् ।।
दुर्गायैनमः

यो प्रार्थना गरेर अर्घ बनाई दीप, कलश, गणेशको पूजा गरी भगवती दुर्गा देवीको विधि पूर्वक पूजा गर्नू, नव पत्रिकामा पनि सप्तमीको जस्तै विधिले पूजा गरी दुर्गादेवीको ध्यान गर्नू ।

देवीको दक्षिण भागमा

१. ॐ जयन्त्यै नमः, २. ॐ मङ्गलायै नमः, ३. ॐ काल्यै नमः, ४. ॐ भद्रकाल्यै नमः, ५. ॐ कपालिन्यै नमः, ६. ॐ दुर्गायै नमः, ७. ॐ क्षमायै नमः, ८. ॐ शिवायै नमः, ९. ॐ धात्र्यै नमः, १०. ॐ स्वाहायै नमः, ११. ॐ स्वधायै नमः ।

देवीको वायाँ भागमा

१. ॐ उग्रदंष्टायै नमः, २. ॐ सुदंष्टायै नमः, ३. ॐ करालिन्यै नमः, ४. ॐ पिङ्ग नेत्रायै नमः, ५. ॐ विशालाक्षी द्व्यै नमः, ६. ॐ मङ्गलायै नमः, ७. ॐ धृत्यै नमः, ८. ॐ आनन्दायै नमः, ९. ॐ सुनन्दायै नमः ।

देवीको अग्रभागमा

१. ॐ ह्रीं मङ्गलायै नमः, २. ॐ ह्रीं नन्दिन्यै नमः, ३. ॐ ह्रीं भद्रायै नमः, ४. ॐ ह्रीं लक्ष्म्यै नमः, ५. ॐ ह्रीं कीर्त्यै नमः, ६. ॐ यशस्विन्यै नमः, ७. ॐ यशस्विन्यै पुष्ट्यै नमः, ८. ॐ यशस्विन्यै मेधायै नमः , ९. ॐ यशस्विन्यै शिवायै नमः, १०. ॐ यशस्विन्यै साध्न्यै नमः, ११. ॐ यशस्विन्यै यशोबत्यै नमः, १२. ॐ यशस्विन्यै शोभायै नमः, १३. ॐ यशस्विन्यै जयायै नमः, १४. ॐ यशस्विन्यै धृत्यै नमः, १५. ॐ यशस्विन्यै आनन्दायै नमः, १६. ॐ यशस्विन्यै सुनन्दायै नमः ।

देवीको पृष्ट भागमा

१. ॐ ह्रीं जयन्त्यै नमः, २. ॐ ह्रीं मङ्गलायै नमः, ३. ॐ ह्रीं काल्यै नमः, ४. ॐ ह्रीं शान्त्यै नमः, ५. ॐ ह्रीं श्यामायै नमः, ६. ॐ ह्रीं ब्रह्माण्यै नमः, ७. ॐ ह्रीं कौशिक्यै नमः, ८. ॐ ह्रीं दुर्गायै नमः, ९. ॐ ह्रीं क्रियायै नमः, १०. ॐ ह्रीं घण्टा कर्णायै नमः, ११. ॐ ह्रीं कपालिन्यै नमः, १२. ॐ ह्रीं रूद्रायै नमः, १३. ॐ ह्रीं क्षमायैनमः, १४. ॐ ह्रीं काल्यै नमः, १५. ॐ ह्रीं भीमायै नमः, १६. ॐ ह्रीं भद्रायै नमः, १७. ॐ ह्रीं सिध्यै नमः, १८. ॐ ह्रीं पुष्ट्यै नमः, १९. ॐ ह्रीं भद्रकाल्यै नमः

देवीको अग्रभागमा ६४ देवीको पूजा गर्ने

१. ॐ ह्रीं वीजायै नमः,	२. ॐ ह्रीं मङ्गलायै नमः
३. ॐ ह्रीं धृत्यै नमः,	४. ॐ ह्रींभद्रायै नमः,
५. ॐ ह्रीं शान्त्यै नमः,	६. ॐ ह्रीं शिवायै नमः,
७. ॐ ह्रीं क्षमायै नमः,	८. ॐ ह्रीं सिध्यै नमः,
९. ॐ ह्रीं तुष्ट्यै नमः	१०. ॐ ह्रीं पुष्ट्यै नमः
११. ॐ ह्रीं उमायै नमः	१२. ॐ ह्रीं श्रियैनमः,
१३. ॐ ह्रीं ऋध्यै नमः,	१४. ॐ ह्रीं दीप्तायै नमः,
१५. ॐ ह्रीं कान्त्यै नमः,	१६. ॐ ह्रीं यशोधार्यै नमः,
१७. ॐ ह्रीं लक्ष्म्यै नमः	१८. ॐ ह्रीं ऐश्वर्यै नमः,
१९. ॐ ह्रीं बृध्यै नमः,	२०. ॐ ह्रीं शक्त्यै नमः,
२१. ॐ ह्रीं जया वत्यैनमः	२२. ॐ ह्रीं ब्राम्ह्यै नमः,
२३. ॐ ह्रीं जयन्त्यै नमः	२४. ॐ ह्रीं अपराजितयै नमः,
२५. ॐ ह्रीं अजितायै नमः,	२६ ॐ ह्रीं मानस्यै नमः
२७. ॐ ह्रीं दित्यै नमः,	२८. ॐ ह्रीं मायायै नमः
२९. ॐ ह्रीं माहामायायै नमः,	३०. ॐ ह्रीं मोहिन्यै नमः,
३१. ॐ ह्रीं रत्यै नमः,	३२. ॐ ह्रीं लालसायै नमः,
३३. ॐ ह्रीं धात्र्यै नमः,	३४. ॐ ह्रीं तारायै नमः,
३५. ॐ ह्रीं विमलायै नमः,	३६. ॐ ह्रीं गौर्यै नमः,
३७. ॐ ह्रीं शरण्यायै नमः,	३८. ॐ ह्रीं कौशिक्यै नमः,
३९. ॐ ह्रीं मत्यै नमः,	४०. ॐ ह्रीं दुर्गायै नमः
४१. ॐ ह्रीं क्रियायै नमः	४२. ॐ ह्रीं अरून्धत्यै नमः,
४३. ॐ ह्रीं कर्णायै नमः,	४४. ॐ ह्रीं कपालिन्यै नमः,
४५. ॐ ह्रीं रूद्रायै नमः,	४६. ॐ ह्रीं काल्यै नमः,
४७. ॐ ह्रीं मायूर्यै नमः,	४८. ॐ ह्रीं त्रिनेत्रायै नमः,
४९. ॐ ह्रीं स्वरूपिण्यै नमः,	५०. ॐ ह्रीं बहुरूपायै नमः,
५१. ॐ ह्रीं रिपुहन्त्र्यै नमः,	५२. ॐ ह्रीं अम्बिकायै नमः,
५३. ॐ ह्रीं चर्चिकायै नमः;	५४. ॐ ह्रीं सुर पूजितायै नमः,
५५. ॐ ह्रीं वैवस्वत्यै नमः,	५६. ॐ ह्रीं कौमार्यै नमः,
५७. ॐ ह्रीं वैष्णव्यै नमः,	५८. ॐ ह्रीं माहेश्वर्यैनमः,
५९. ॐ ह्रीं शिव दूत्यैनमः,	६०. ॐ ह्रीं कार्तिक्यै नमः,
६१. ॐ ह्रीं कुशिकायै नमः,	६२. ॐ ह्रीं चामुण्डायै नमः,
६३. ॐ ह्रीं भगवत्यै नमः,	६४. ॐ ह्रीं चण्डिकायै नमः

अथ अष्ट दिक्षु

आठ दिशामा अष्ट मातृकाको पूजा

१. ॐ ह्रीं ब्रह्माण्यै नमः,
२. ॐ ह्रीं माहेश्वर्यै नमः,
३. ॐ ह्रीं कौमार्यै नमः,
४. ॐ ह्रीं वैष्णव्यै नमः,
५. ॐ ह्रीं बाराह्यै नमः,
६. ॐ ह्रीं इन्द्राण्यै नमः,
७. ॐ ह्रीं चामुण्डायै नमः,
८. ॐ ह्रीं महालक्ष्म्यै नमः

भैरवको अवाहन गरी पूजा गर्नू -

प्रार्थना गर्ने मन्त्र

भैरवं परमं देवं सर्वकामप्रसाधनम् ।
पूजयाम्यग्रतो देव्या सर्वाप्तिक फलप्रदम ।।

ॐ दुर्गे दुर्गे रक्षणि स्वाहा

दुर्गा देव्यै नमः - अर्घ दिने श्री खण्ड चन्दन चढाउने

बेलपत्र भगवतीलाई चढाउने मन्त्र

सुधोद् भवं च श्रीवृक्षं शङ्करस्य सदाप्रियम् ।
पवित्रं ते प्रयच्छामि बिल्व पत्रं सुरेश्वरि ।।
बिल्व पत्रं समर्पयामि दुर्गा देव्यै नमः ।

अब भगवतीलाई बेल पत्रको माला चढाउने मन्त्र

चन्दनेन समालिप्ते कुंकुमेन विलेपिते ।
बिल्वपत्रकृतांमालां गृहाण सुरवन्दिते ।।
बिल्वपत्र मालां समर्पयामि दुर्गा देव्यै नमः ।

सिंह पूजा

ॐ हूं महाशार्दूल वितानाय पिङ्गल लोचनाय सिंहाय नमः ।

अस्त्रहरूको पूजा गर्ने

सफा गरेर राखेको खड्ग, खुकुरी, छुरी आदिलाई काँचो धागो‍
३ पटक समाउने तर्फ वेरी काठ आदिमा अड्याएर राखी पूज
गर्ने ।

ॐ खड्गाय नमः, ॐ त्रिशूलाय नमः, ॐ बज्रायनमः, ॐ वाणा
नमः, ॐ चक्राय नमः, ॐ ढालाय नमः, ॐ छुरिकायै नमः, ॐ
कट्टारकाय नमः, ॐ भालायै नमः, ॐ धनुषे नमः, ॐ दुन्दुभ
नमः, ॐ कुन्ताय नमः, ॐ चर्म कवचाय नमः ।

कालरात्रीको विधि गर्नेले पण्डित बोलाई अग्नि स्थापनाको विधि
पूर्वक हवन गर्ने पायसले भगवतीको १०८ पटक हवन गर
त्यसो नगर्नेले आफैले १०८ पटक मकलमा आगो बाली पायस
हवन गर्ने कुभिण्डोको बलि दिनेले बलिदान गर्ने प्रसाद ग्रह
गर्ने ।

महानवमी

महानवमीको दिन मभ सम्म सङ्कल्प पढेर अद्य आश्विन शुल
महानवम्यां सकल पाप क्षय पूर्वक धर्म यशो दीर्घायुष
ब्रह्मेन्द्र रूद्रादिलोक प्राप्ति काम स्त्रिशूलिनीं दुर्गां चण्डिका
पूज यिष्ये भनि पढने र यी देवीहरूको पूजा गर्ने -

ॐ त्रिशूलिन्यै नमः, ॐ दुर्गायै नमः, ॐ शिवायै नमः, ॐ शाङ्क
नमः, ॐ चण्डिकायै नमः ।

दुर्गाको पूजा, पाठ, होम आदि माथि बताए अनुसार गर्ने ।

वाहनहरूको पूजा

यस दिन वाहनहरूको पूजा अर्थात मोटर, मोटर साइक
मेशिन, हात्ति घोडा आदि सबै वाहनहरूको पूजा गर्ने ।

नवमीको दिन बलि दिनेले विधि पूर्वक बलि दिने । स्थाप
गरेका सबै शस्त्रास्त्रहरूको पूजा धूप बत्ति समेत गर्ने ।

नवमीको पूजा पाठ होम आदि समाप्त गरी, कन्याको पूजा गरी वस्त्र, अलङ्कार आदि दिने ।

कन्याको प्रार्थना गर्ने मन्त्र

जगत्पूज्ये सर्ववन्द्ये सर्व शक्ति स्वरूपिणि ।
पूजां गृहाण कौमारि जगन्मातर्नमोऽस्तुते ।।

विजयादशमीको दिन

भगवतीको सात्विक सबै पूजा गर्ने र विशेषमा जौ तिल कुश पानी लिएर संकल्प गर्ने -

माथिको सङ्कल्पको मम सम्म पढेर अद्य आश्विन शुक्ल दशम्यां विजय सिध्यर्थं नवदुर्गा पूजाया न्यूनातिरिक्त परिपूर्णार्थं अपराजिता देवी पूजन पूर्वक विसर्जन महं करिष्ये । यो सङ्कल्प पढेर चन्दनले थालिमा अष्ट दल लेखेर प्रतिमा अथवा सुपारी बीचमा राखेर पूजा गर्ने -

मध्ये भागमा ॐ अपराजितायै नमः, दाहिने तर्फ क्रियासिध्यै जयायै नमः, बाया तर्फ उमायै विजयायै नमः, भनि पूजा गर्ने ।

पहेलो कपडामा अपराजिताको पात बेसार सस्युँ दूबो राता अक्षता राखेर ॐ भनेर धागोले पोटलिका बाँध्नु र प्रतिष्ठा गरी पोटलिकाको विधिपूर्वक पूजा गरी यो मन्त्रले प्रार्थना गर्नू -

सदा पराजिते यस्मात् त्वं लतासूत्तमा स्मृता ।।
सर्व कामार्थ सिध्यर्थं तस्मात् त्वां पूजयाम्यहं ।।
भवा पराजिते देवि मम सर्व समृद्धये ।।
पूजितायां त्वयि श्रेयो ममास्तु दुरितं हत ।।

यो मन्त्रले अपराजिता भगवतीमा चढाएर पछि विसर्जन गरी कर्ताले दाहिने हातमा धारणा गर्नु पर्दछ । धारण मन्त्र -

जयदे वरदे देवि दशम्यामपराजिते ।
धारमयामि भुजे दद्दो जयलाभाभिवृद्धये ।।
वलयाधेहि वलय मायुः शत्रौं पराजयम् ।
तद्धारणात् भवेयुर्मे धनधान्यसमृद्धयः ।।

यो मन्त्रले हातमा बाधने आज पाठ होम आदि गर्नु पर्दैन भगवतीको पुष्पाञ्जलि, प्रार्थना, नमस्कार गरी अर्घ निवेदन गर्ने मन्त्र -

ॐ गन्धाद्यतैश्च संयुक्तं फल पुष्प युतं तव ।
दत्तमर्घ्यं गृहाणेदं प्रसीद परमेश्वरि ।।
इदं अर्घ्यं समर्पयामि दुर्गा देव्यै नमः ।

मूल देवीको प्रार्थना गर्ने मन्त्र -

रूपं देहि यशोदेहि भगं भवति देहिमे ।
पुत्रान्देहि तथा मातः सर्वं कामांश्च देहि मे ।।
महिषघ्नि महामाये चामुण्डे मुण्ड मालिनि ।
आयुरारोग्य मैश्वर्यं देहि देवि नमोस्तुते ।।
यो मन्त्र पढेर दर्शन गर्ने ।

पूर्ण पात्र दान

पूर्ण पात्रको पूजा गरी सङ्कल्प गर्न हातमा लिने ।

माथिको सङ्कल्पको मम सम्म भने पछि पूर्वोक्त फल प्राप्त्यर्थम् आश्विन शुक्ल प्रतिपद आरम्य नवमी पर्यन्तं महाकाली, महालक्ष्मी, महा सरस्वती रूपाया दुर्गा देव्या पूजन कर्मण स्तथा सप्तशत्याः पाठ कर्मणः सप्तमीत आरम्य नवमी पर्यन्तं कृतस्य हवन कर्मणश्च साफल्यार्थ मिदं तण्डुल पूर्ण पात्रं प्रजापति दैवतं गोत्राय शर्मणे ब्राह्मणाय तुभ्य मह संप्रददे तत्सन्नमम ।

दक्षिणा सङ्कल्प

दक्षिणा द्रव्यलाई पूजागरी कुश जल लिई उठाउने । र माथिको सङ्कल्पको मम सन्म भने पछि र पूर्ण पात्रको साफल्यार्थम् सन्म भनि इदं दक्षिणा द्रव्यं रौप्यं चन्द्र दैवताकम् गोत्राय शमर्णे ब्राह्मणाय तुभ्य महं संप्रददे तत्सन्नमम ।

फूल अक्षता चढाएर दीप कलश गणेश र दुर्गा देवीको विसर्जन गर्ने मन्त्र

ॐ दुर्गे देवि जगन्मातः स्वस्थानं गच्छ पूजिते ।
सम्वत्सरे व्यतीतेतु पुनरागमनायवै ।।

घडालाई उठाउने मन्त्र

ॐ उतिष्ठ देवि चामुण्डे शुभ पूजां प्रगृह्यच ।
कुरूष्व मम कल्याण मष्टाभिः शक्तिभिः सह ।।
गच्छ गच्छ परं स्थानं स्वस्थानं देवि चण्डिके ।
यत्पूजितं मया देवि परिपूर्णं तदस्तुमे ।।
भो भगवति दुर्गे पूजिताऽसि क्षमस्व

कर्म पात्रको जल कुश तिल लिएर

कायेन वाचा मनसेन्द्रियैर्वा,
बुध्यात्मनावा प्रकृतेः स्वभावात् ।
करोमि यद्यत, सकलं परस्मै,
नारायणायेति समर्पयामि ।।

एतत्कर्म श्री कृष्णार्पण मस्तु भनि चढाई दिने ।

हात जोड्ने मन्त्र

यस्य स्मृत्वा च नामोक्त्या तपोयज्ञक्रियादिषु ।
न्यूनं सम्पूर्णतां यति सद्योवन्दे तमच्युतम् ।।

ॐ अच्युताय नमः ३

देवी भक्तहरूलाई जल प्रसाद छुट्याउने -

ॐ देवी भक्तेभ्यो नमः ।

अब ब्राह्मणद्वारा अभिषेक तथा प्रसाद ग्रहण र पोटलिका बन्धन अभिषेक गर्ने मन्त्र

ॐ द्यौः शान्ति ....

प्रसाद लगाईं दिदा भन्ने मन्त्र

स्वस्त्यस्तुते कुशलमस्तु चिरायुरस्तु,
गोवाजिहस्तिधनधान्य समृद्धि रस्तु ।
ऐश्वर्य मस्तु वलमस्तु रिपुक्षयोस्तु,
संतान बृद्धि सहिता हरि भक्ति रस्तु ।।

भद्रमस्तु शिवं चास्तु महालक्ष्मीः प्रसीदतु । रक्षन्तु त्वां सदा देवा आशिषः सन्तु सर्वदा ।

बलिदान विधि

कूष्माण्ड वलि प्रदानमा देवीको अगाडि अवीरले षट्कोण लेखेर फूल अक्षताले षट्कोण मण्डल देवताभ्यो नमः भनि पूजा गर्नू । खुन नभएको कुमिण्डोलाई कर्मपात्रका जलले अपवित्रः पवित्रो वा .... यो मन्त्र पढेर सेचन गरी ॐ कूष्माण्ड बलये नमः भनेर पूजा गर्नू ।

खड्ग पूजा-

खड्गलाई शुद्धपारी सेचन गरी ॐ खड्गाय नमः भनेर पूजा गरी प्रार्थना गर्ने मन्त्र-

असि विंशसनः खड्गस्तीक्षणधारो दुरासदः । श्रीगर्भो विजयश्चैव धर्मपाल नमोऽस्तुते ।।

कूष्माण्ड वलिको सङ्कल्प-

कुश तिल जल लिएर कुभिण्डोलाई छोएर सङ्कल्प गर्नें अद्ये पूर्व सङ्कल्प सिद्धिरस्तु (अमुक) गोत्र अहम् श्री दुर्गा दे प्रीत्यर्थं कूष्माण्डाय महा महिष फल रूपाय महाद्भुत दानवा श्री दुर्गा त्रिपुर सुन्दरी महाष्टमी नवमी संयुक्ताय महाका शाकंभरी प्रियाय मम सकल शत्रु दुष्ट जनान् भद्राय प्रसादं कु कुरू इमं वलिं महिष मर्दिनीं प्रीतये अर्पयिष्ये । भवती कौशिव कूष्माण्ड वलिना आप्यायताम् यति पढेर भगवतीलाई अर्प गर्नू ।

अथ छाग वलि दान विधि-

<u>वोकालाई सेचन गर्नें मन्त्र</u>-

ॐ स्वयं भूर्वासुदेवश्च शङ्करश्च महोदयः ।
सदाराश्च सपुत्राश्च सगणाश्च सशक्तयः ।।
प्रोद्दान्तु त्वां पशु श्रेष्ट मेते विश्वास हेतवः ।।
वोकालाई पूजा गर्नें धूप दीप नैवेद्य आदि गर्नें ।

प्रार्थना गर्नें मन्त्र-

ॐ यज्ञार्थे पशवः सृष्टाः स्वयमेव स्वयंभुवा ।
अतस्त्वं घातयिष्यामि तस्माद यज्ञे वधोऽवधः ।
वोकाको दाहिने कानमा तीनपटक सुनाउने मन्त्र-
ॐ पशु पाशाय विद्महे शिरश्छेदाय धीमहि तन्नः प
प्रचोदयात् ।

खड्ग पूजा-

पहिले कर्मपात्रको जलले सेचन गरी शुद्ध पारी ॐ खड्गाय न भनेर पूजा गरी प्रार्थना गर्नें मन्त्र-

ॐ असि विंशसनः खड्गस्तीक्ष्ण धारो दुरासदः ।
श्री गर्भो विजयश्चैव धर्मपाल नमोऽस्तुते ।।

वोकालाई पर्शाउने (मनाउने)

कुश तिल जल लिएर संकल्प-

अद्येह पूर्व सङ्कल्प सिद्धिरस्तु अहं मम सदारापत्यस्य सकलापत्ति शान्ति नाना विध कल्याणोत्पति दीर्घायु रारोग्य बल पुष्टि राज सम्मान प्राप्तिकामः दशवर्णा वच्छिन्न दुर्गादेवी प्रीतये इमं छागं वन्हि दैवतं भगवत्यै दुर्गा देव्यै अर्पयिष्ये ।

ॐ ह्रीं श्रीं यो मन्त्र पढेर बोको बलि दिई बोकाको मुखमा जल हालि दिनू ।

रगत लिएर सङ्कल्प गर्नू-

मम पूर्वोक्त फल सिद्धये दशवर्षा वाच्छिन्न दुर्गा प्रीति कामनया-इदं छाग रूधिरं विष्णुदैवतं दुर्गा देव्यै समर्पये ।

चार दिन पछि चतुर्थी कर्म

आश्विन शुक्ल त्रयोदशीको दिन अर्थात विर्सजन गरेको चारौ दिन चतुर्थी गर्ने चलन ठूलाबडाहरू कहाँ छ ।

त्यस दिन देवि पूजा गरेको कोठामा गई देवि त्यहाँ विराजमान हुनुहुन्छ भन्ने धारणा लिनु पर्दछ । आसनमा बसि पहिलेको जस्तै कर्मपात्र बनाई सेचन गरि कुश तिल जल लिएर सङ्कल्प गर्ने माथिको सङ्कल्पको मम सम्म भनेपछि शरत्कालिक दुर्गा देव्याः पूजन कर्मणः साङ्गता सिद्धये श्री दुर्गा देव्याः पूजोपकरण विसर्जन चतुर्थी कर्म च अहं करिष्ये यति भनि कुश जल छोडि दिने माथि जस्तै अर्घ दीप कलश गणेश थापी पूजा गरी मध्य भागमा दुर्गा भगवतीको थालीमा प्रतिमा राखी पूजा विधिपूर्वक गरी विसर्जन गरेर अभिषेक प्रसाद ग्रहण गर्ने गर्छन् । साधारण जनताले दुर्गा भगवतीलाई सम्झी नमस्कार गरी जमरा प्रसाद आदि सेलाउने गर्दछन् ।

<u>घटस्थापनाको दिन दुर्गा पूजाको सामग्री</u>

जमरा राख्ने बालुवा वा माटो/ उम्रने खालको जौ/ घटस्थापना गर्ने घडा/ रेखिको पिठो/ अबीर/ कर्मपात्र/ अर्घ/ त्रिकुटी/

घण्ट/ शङ्ख/ डमरू/ पूजासामग्री/ फूल, दूबो/ माला/ बेलपत्र/ बेलपत्रको माला/ गोकुल धुप/ धुपौरा/ बत्ती/ कपूर/ नौसुते बत्ती ९ जोर/ वस्त्र/ जनै/ सुपारी/ दियो/ कलश/ गणेश/ दियो छोप्ने ऐना घर/ तिलको तेल/ रोटी नैवेद्य/ फलफूल/ दीप कलश गणेश आदि थाप्ने चामल/ टपरी ४/बारा/ पान-मसला/ बलिको निमित्त/कुभिण्डो/ काक्रो, मूला, उखु, बेल, नरीवलहरू/ खड्ग/ कन्या पूजाको निमित्त वस्त्र, सौभाग्य आभूषण/ नैवेद्य, दक्षिणा/ (प्रतिपदा देखि लिएर दशमीको दिन सम्मलाई पुग्ने गरी राख्ने/ पूजा सामाग्रीहरू प्रायशः यिनै हुन ।

शब्दार्थ

अग्रभाग-अगाडिपट्टि	छाग-बोका
अक्षता-चामल	जल-चोखोपानी
अष्ट दिक्षु-आठै दिशा	ताम्बुलपूङ्गीफल-पान मसाला
अर्घ्यं-अर्घको जल	दक्षिणभाग-दक्षिण
अष्टमातृ-आठमातृका	दक्षिणा-ब्राह्मणलाई दिने रूपैया
अलङ्कार-गहना	दक्षिणा द्रव्यम्-रूपैया
अर्पण-चढाउनु	दीपम्-बत्ति
अस्त्र-हतियार	नवपत्रिका-नौचिजकोबोट
आचमनीयम्-जल	नीराजनम्-बत्ति कपुर
आभूषण-गहना	शाखाछेदन-हाँगाकाट्ने
कलश-माटाको वा तामाको घैटा	श्रीफल-बेल
	षोडसोपचार-सर्वसामग्रीपूजा
कुष्माण्ड-कुभिण्डो	सौभाग्यवस्तु-चुरा,धागो,सिन्दुर, ऐना,टिका आदि
खड्ग-हतियार	

गो पूजा-गाईको अभावमा रूपैया

घडा-गाग्रो

चन्दन-श्रीखण्ड, केशरी

चरू-चामल, जौ, तिल आदि

॥ श्रीः ॥

अथ दुर्गाकवच प्रारम्भः

ॐ नमश्चण्डिकायै ॥

मार्कण्डेय उवाच

ॐ यद्गुह्यं परमं लोके सर्वरक्षाकरं नृणाम् ।
यन्न कस्यचिदाख्यातं तन्मे ब्रूहि पितामह ॥ १ ॥

ब्रह्मोवाच

अस्ति गुह्यतमं विप्र सर्वभूतोपकारकम् ।
देव्यास्तु कवचं पुण्यं तच्छृणुष्व महामुने ॥ २ ॥
प्रथमं शैलपुत्री च द्वितीयं ब्रह्मचारिणी ।
तृतीयं चन्द्रघण्टेति कूष्माण्डेति चतुर्थकम् ॥ ३ ॥
पञ्चमं स्कन्दमातेति षष्ठं कात्यायनीति च ।
सप्तमं कालरात्रीति महागौरीति चाष्टमम् ॥ ४ ॥
नवमं सिद्धिदात्री च नवदुर्गाः प्रकीर्तिताः ।
उक्तान्येतानि नामानि ब्रह्मणैव महात्मना ॥ ५ ॥
अग्निना दह्यमानस्तु शत्रुमध्ये गतो रणे ।
विषमे दुर्गमे चैव भयार्त्ताः शरणं गताः ॥ ६ ॥
न तेषां जायते किंचिदशुभं रणसंकटे ।
आपदं तस्य पश्यामि शोकदुःखभयं न हि ॥ ७ ॥

यैस्तु भक्त्या स्मृता नूनं तेषां वृद्धिः प्रजायते ।
ये त्वां स्मरन्ति देवेशि रक्षसे तान्न संशयः ॥ ८ ॥
प्रेतसंस्था तु चामुण्डा वाराही महिषासना ।
ऐन्द्री गजसमारूढा वैष्णवी गरुडासना ॥ ९ ॥
माहेश्वरी वृषारूढा कौमारी शिखिवाहना ।
लक्ष्मीः पद्मासना देवी पद्महस्ता हरिप्रिया ॥ १० ॥
श्वेतरूपधरा देवी ईश्वरी वृषवाहना ।
ब्राह्मी हंससमारूढा सर्वाभरणभूषिता ॥ ११ ॥
इत्येता मातरः सर्वाः सर्वयोगसमन्विताः ।
नानाभरणशोभाढ्या नानारत्नोपशोभिताः ॥ १२ ॥
दृश्यन्ते रथमारूढा देव्यः क्रोधसमाकुलाः ।
शङ्खं चक्रं गदां शक्तिं हलं च मुसलायुधम् ॥ १३ ॥
खेटकं तोमरं चैव परशुं पाशमेव च ।
कुन्तायुधं त्रिशूलं च शार्ङ्गमायुधमुत्तमम् ॥ १४ ॥
दैत्यानां देहनाशाय भक्तानामभयाय च ।
धारयन्त्यायुधानीत्थं देवानां च हिताय वै ॥ १५ ॥
नमस्तेऽस्तु महारौद्रे महाघोरपराक्रमे ।
महाबले महोत्साहे महाभयविनाशिनि ॥ १६ ॥
त्राहि मां देवि दुष्प्रेक्ष्ये शत्रूणां भयवर्द्धिनि ।
प्राच्यां रक्षतु मामैन्द्री आग्नेय्यामग्निदेवता ॥ १७ ॥

दक्षिणेऽवतु वाराही नैर्ऋत्यां खड्गधारिणी ।
प्रतीच्यां वारुणी रक्षेद् वायव्यां मृगवाहिनी ॥१८॥
उदीच्यां पातु कौमारी ऐशान्यां शूलधारिणी ।
ऊर्ध्वं ब्रह्माणि मे रक्षेदधस्ताद् वैष्णवी तथा ॥१९॥
एवं दश दिशो रक्षेच्चामुण्डा शववाहना ।
जया मे चाग्रतः पातु विजया पातु पृष्ठतः ॥२०॥
अजिता वामपार्श्वे तु दक्षिणे चापराजिता ।
शिखामुद्योतिनी रक्षेदुमा मूर्ध्नि व्यवस्थिता ॥२१॥
मालाधरी ललाटे च भ्रुवौ रक्षेद् यशस्विनी ।
त्रिनेत्रा च भ्रुवोर्मध्ये यमघण्टा च नासिके ॥२२॥
शङ्खिनी चक्षुषोर्मध्ये श्रोत्रयोर्द्वारवासिनी ।
कपोलौ कालिका रक्षेत्कर्णमूले तु शाङ्करी । २३॥
नासिकायां सुगन्धा च उत्तरोष्ठे च चर्चिका ।
अधरे चामृतकला जिह्वायां च सरस्वती ॥२४
दन्तान् रक्षतु कौमारी कण्ठदेशे तु चण्डिका ।
घण्टिकां चित्रघण्टा च महामाया च तालुके । २५॥
कामाक्षी चिबुकं रक्षेद् वाच मे सर्वमङ्गला ।
ग्रीवायां भद्रकाली च पृष्ठवंशे धनुर्धरी ॥२६॥
नीलग्रीवा बहिःकण्ठे नलिकां नलकूबरी ।
स्कन्धयोः खड्गिनी रक्षेद् बाहू मे वज्रधारिणी ॥२७॥

हस्तयोर्दण्डिनी रक्षेदम्बिका चाङ्गुलीषु च ।
नखाञ्छूलेश्वरी रक्षेत्कुक्षौ रक्षेत्कुलेश्वरी ॥२८॥
स्तनौ रक्षेन्महादेवी मनःशोकविनाशिनी ।
हृदये ललिता देवी उदरे शूलधारिणी ॥२९॥
नाभौ च कामिनी रक्षेद् गुह्यं गुह्येश्वरी तथा ।
पूतना कामिका मेढ्रं गुदे महिषवाहिनी ॥३०॥
कट्यां भगवती रक्षेज्जानुनी विन्ध्यवासिनी ।
जङ्घे महाबला रक्षेत्सर्वकामप्रदायिनी ॥३१॥
गुल्फयोर्नारसिंही च पादपृष्ठे तु तैजसी ।
पादाङ्गुलीषु श्री रक्षेत्पादाधस्तलवासिनी ॥३२॥
नखान् दंष्ट्राकराली च केशांश्चैवोर्ध्वकेशिनी ।
रोमकूपेषु कौबेरी त्वचं वागीश्वरी तथा ॥३३॥
रक्तमज्जावसामांसान्यस्थिमेदांसि पार्वती ।
अन्त्राणि कालरात्रिश्च पित्तं च मुकुटेश्वरी ॥३४॥
पद्मावती पद्मकोशे कफे चूडामणिस्तथा ।
ज्वालामुखी नखज्वालामभेद्या सर्वसन्धिषु ॥३५॥
शुक्रं ब्रह्माणि मे रक्षेच्छायां छत्रेश्वरी तथा ।
अहंकारं मनो बुद्धिं रक्षेन्मे धर्मधारिणी ॥३६॥
प्राणापानौ तथा व्यानमुदानं च समानकम् ।
वज्रहस्ता च मे रक्षेत्प्राणं कल्याणशोभना ॥३७॥
रसे रूपे च गन्धे च शब्दे स्पर्शे च योगिनी ।
सत्त्वं रजस्तमश्चैव रक्षेन्नारायणी सदा ॥३८॥

आयू रक्षतु वाराही धर्मं रक्षतु वैष्णवी ।
यशः कीर्तिं च लक्ष्मीं च धनं विद्यां च चक्रिणी ॥ ३९ ॥
गोत्रमिन्द्राणि मे रक्षेत्पशून्मे रक्ष चण्डिके ।
पुत्रान् रक्षेन्महालक्ष्मीर्भार्यां रक्षतु भैरवी ॥ ४० ॥
पन्थानं सुपथा रक्षेन्मार्गं क्षेमकरी तथा ।
राजद्वारे महालक्ष्मीर्विजया सर्वतः स्थिता ॥ ४१ ॥
रक्षाहीनं तु यत्स्थानं वर्जितं कवचेन तु ।
तत्सर्वं रक्ष मे देवि जयन्ती पापनाशिनी ॥ ४२ ॥
पदमेकं न गच्छेत्तु यदीच्छेच्छुभमात्मनः ।
कवचेनावृतो नित्यं यत्र यत्रैव गच्छति ॥ ४३ ॥
तत्र तत्रार्थलाभश्च विजयः सार्वकामिकः ।
यं यं चिन्तयते कामं तं तं प्राप्नोति निश्चितम् ।
परमैश्वर्यमतुलं प्राप्स्यते भूतले पुमान् ॥ ४४ ॥
निर्भयो जायते मर्त्यः संग्रामेष्वपराजितः ।
त्रैलोक्ये तु भवेत्पूज्यः कवचेनावृतः पुमान् ॥ ४५ ॥
इदं तु देव्याः कवचं देवानामपि दुर्लभम् ।
यः पठेत्प्रयतो नित्यं त्रिसन्ध्यं श्रद्धयान्वितः ॥ ४६ ॥
दैवी कला भवेत्तस्य त्रैलोक्येष्वपराजितः ।
जीवेद् वर्षशतं साग्रमपमृत्युविवर्जितः ॥ ४७ ॥

नश्यन्ति व्याधयः सर्वे लूताविस्फोटकादयः।
स्थावरं जङ्गमं चैव कृत्रिमं चापि यद्विषम् ॥४८॥
अभिचाराणि सर्वाणि मन्त्रयन्त्राणि भूतले।
भूचराः खेचराश्चैव जलजाश्चोपदेशिकाः ॥४९॥
सहजा कुलजा माला डाकिनी शाकिनी तथा।
अन्तरिक्षचरा घोरा डाकिन्यश्च महाबलाः ॥५०॥
ग्रहभूतपिशाचाश्च यक्षगन्धर्वराक्षसाः।
ब्रह्मराक्षसवेतालाः कूष्माण्डा भैरवादयः ॥५१॥
नश्यन्ति दर्शनात्तस्य कवचे हृदि संस्थिते।
मानोन्नतिर्भवेद् राज्ञस्तेजोवृद्धिकरं परम् ॥५२॥
यशसा वर्द्धते सोऽपि कीर्तिमण्डितभूतले।
जपेत्सप्तशतीं चण्डीं कृत्वा तु कवचं पुरा ॥५३॥
यावद्भूमण्डलं धत्ते सशैलवनकाननम्।
तावत्तिष्ठति मेदिन्यां सन्ततिः पुत्रपौत्रिकी ॥५४॥
देहान्ते परमं स्थानं यत्सुरैरपि दुर्लभम्।
प्राप्नोति पुरुषो नित्यं महामायाप्रसादतः ॥५५॥
लभते परमं रूपं शिवेन सह मोदते ॥ ॐ ॥५६॥

इति देव्याः कवचं सम्पूर्णम्

अथ कीलकस्तोत्र प्रारम्भः

ॐ नमश्चण्डिकायै ॥

मार्कण्डेय उवाच

ॐ विशुद्धज्ञानदेहाय त्रिवेदीदिव्यचक्षुषे ।
श्रेयःप्राप्तिनिमित्ताय नमः सोमार्द्धधारिणे ॥ १ ॥
सर्वमेतद्विजानीयान्मन्त्राणामभिकीलकम् ।
सोऽपि क्षेममवाप्नोति सततं जाप्यतत्परः ॥ २ ॥
सिद्ध्यन्त्युच्चाटनादीनि वस्तूनि सकलान्यपि ।
एतेन स्तुवतां देवी स्तोत्रमात्रेण सिद्ध्यति ॥ ३ ॥
न मन्त्रो नौषधं तत्र न किञ्चिदपि विद्यते ।
विना जाप्येन सिद्ध्येत सर्वमुच्चाटनादिकम् ॥ ४ ॥
समग्राण्यपि सिद्ध्यन्ति लोकशङ्कामिमां हरः ।
कृत्वा निमन्त्रयामास सर्वमेवमिदं शुभम् ॥ ५ ॥
स्तोत्रं वै चण्डिकायास्तु तच्च गुप्तं चकार सः ।
समाप्तिर्न च पुण्यस्य तां यथावन्नियन्त्रणाम् ॥ ६ ॥
सोऽपि क्षेममवाप्नोति सर्वमेवं न संशयः ।
कृष्णायां वा चतुर्दश्यामष्टम्यां वा समाहितः ॥ ७ ॥
ददाति प्रतिगृह्णाति नान्यथैषा प्रसीदति ।
इत्थंरूपेण कीलेन महादेवेन कीलितम् ॥ ८ ॥

यो निष्कीलां विधायैनां नित्यं जपति संस्फुटम् ।
स सिद्धः स गणः सोऽपि गन्धर्वो जायते नरः ॥ ९ ॥
न चैवाप्यटतस्तस्य भयं क्वापीह जायते ।
नापमृत्युवशं याति मृतो मोक्षमवाप्नुयात् ॥१०॥
ज्ञात्वा प्रारभ्य कुर्वीत न कुर्वाणो विनश्यति ।
ततो ज्ञात्वैव सम्पन्नमिदं प्रारभ्यते बुधैः ॥११॥
सौभाग्यादि च यत्किञ्चिद् दृश्यते ललनाजने ।
तत्सर्वं तत्प्रसादेन तेन जाप्यमिदं शुभम् ॥१२॥
शनैस्तु जप्यमानेऽस्मिन् स्तोत्रे सम्पत्तिरुच्चकैः ।
भवत्येव समग्रापि ततः प्रारभ्यमेव तत् ॥१३॥
ऐश्वर्यं यत्प्रसादेन सौभाग्यारोग्यसम्पदः ।
शत्रुहानिः परो मोक्षः स्तूयते सा न किं जनैः ॥ॐ॥१४॥
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥१५॥
विद्यावन्तं यशस्वन्तं लक्ष्मीवन्तं जनं कुरु ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥१६॥
प्रचण्डदैत्यदर्पघ्ने चण्डिके प्रणताय मे ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥१७॥
चतुर्भुजे चतुर्वक्त्रसंस्तुते परमेश्वरि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥१८॥
कृष्णेन संस्तुते देवि शश्वद्भक्त्या सदाम्बिके ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥१९॥

हिमाचलसुतानाथसंस्तुते परमेश्वरि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥२०॥
इन्द्राणीपतिसद्भावपूजिते परमेश्वरि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ २१ ॥
देवि प्रचण्डदोर्दण्डदैत्यदर्पविनाशिनि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ २२ ॥
देवि भक्तजनोद्दामदत्तानन्दोदयेऽम्बिके ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ २३ ॥
पत्नीं मनोरमां देहि मनोवृत्तानुसारिणीम् ।
तारिणीं दुर्गसंसारसागरस्य कुलोद्भवाम् ॥ २४ ॥
इदं स्तोत्रं पठित्वा तु महास्तोत्रं पठेन्नरः ।
स तु सप्तशतीसंख्यावरमाप्नोति सम्पदाम् ॐ ॥ २५ ॥

इति देव्या अर्गलास्तोत्रं सम्पूर्णम् ।

अथार्गलास्तोत्रम्

ॐ अस्य श्रीअर्गलास्तोत्रमन्त्रस्य विष्णुर्ऋषिः, अनुष्टुप् छन्दः, श्रीमहालक्ष्मीर्देवता श्रीजगदम्बाप्रीतये सप्तशतीपाठाङ्गत्वेन जपे विनियोगः॥

ॐ नमश्चण्डिकायै ॥

मार्कण्डेय उवाच

ॐ जयन्ती मङ्गला काली भद्रकाली कपालिनी ।
दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तु ते ॥ १ ॥
जय त्वं देवि चामुण्डे जय भूतार्तिहारिणि ।
जय सर्वगते देवि कालरात्रि नमोऽस्तु ते ॥ २ ॥
मधुकैटभविद्राविविधातृवरदे नमः ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ ३ ॥
महिषासुरनिर्णाशि भक्तानां सुखदे नमः ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ ४ ॥
रक्तबीजवधे देवि चण्डमुण्डविनाशिनि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ ५ ॥
शुम्भस्यैव निशुम्भस्य धूम्राक्षस्य च मर्दिनि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ ६ ॥
वन्दिताङ्घ्रियुगे देवि सर्वसौभाग्यदायिनि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ ७ ॥
अचिन्त्यरूपचरिते सर्वशत्रुविनाशिनि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ ८ ॥

नतेभ्यः सर्वदा भक्त्या चण्डिके दुरितापहे ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ ९ ॥
स्तुवद्भ्यो भक्तिपूर्वं त्वां चण्डिके व्याधिनाशिनि ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥१०॥
चण्डिके सततं ये त्वामर्चयन्तीह भक्तितः ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥११॥
देहि सौभाग्यमारोग्यं देहि मे परमं सुखम् ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥१२॥
विधेहि द्विषतां नाशं विधेहि बलमुच्चकैः ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥१३॥
विधेहि देवि कल्याणं विधेहि परमां श्रियम् ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥१४॥
सुरासुरशिरोरत्ननिघृष्टचरणेऽम्बिके ।

इति देव्याः कीलकस्तोत्रं सम्पूर्णम् ।

पेज नं. ३८ को श्लोक १५ देखि
श्लोक २५ सम्म यहां श्लोक १४ पछि
हुनु पर्ने भूलले पेज न ३७ मा
भएकोले सच्याई पाठ गर्नु हुन ।

अथ काली-कवच प्रारम्भः

श्रीगणेशाय नमः ॥ अथ प्राणप्रतिष्ठा ॥ ॐ प्राणप्रतिष्ठा मन्त्रस्य ब्रह्माविष्णुरुद्रा ऋषयः ऋग्यजुःसामाथर्वाणि छन्दांसि जगत् सृष्टिकारिणी प्राणशक्तिर्देवता ॐ आं बीजं ह्रीं शक्तिः प्राणप्रतिष्ठा सिद्ध्यर्थे जपे विनियोगः ॥ ॐ आँ ह्रीं क्रौं यं रं लं वं शं षं सं हं सः सोंहं क्रौं ह्रीं आँ काल्यः प्राणा इह प्राणाः ॥१॥ ॐ आँ ह्रीं क्रौं यं रं लं वं शं षं सं हं सः सोंहं क्रों ह्रीं आँ काल्या जीव इह स्थितः ॥ २ ॥ ॐ आँ ह्रीं क्रों यं रं लं वं शं षं सं हं सः सोहं क्रों ह्रीं आँ काल्याः सर्वेन्द्रियाणि इह स्थितानि ॥३॥ ॐ आँ ह्रीं क्रों यं रं लं वं शं षं सं हं सः होंहं क्रों ह्रीं आं काल्या वाङ्मनश्चक्षुस्त्वक् श्रोत्रघ्राणरसना प्राणेहागत्य सुखं चिरं तिष्ठतु स्वाहा । इहि प्राणप्रतिष्ठा ।

ॐ कैलासशिखरारूढ शङ्करं वरदं शिवम् ।
गौरी पप्रच्छ सर्वज्ञं देवदेवं महेश्वरम् ॥१॥ देव्यु-

वाच—भगवन् देवदेवेश देवानाम्मार्गद प्रभो ॥
शत्रूणां येन नाशः स्यादात्मानं रक्षणं भवेत् ॥२॥
तद्ब्रूहि मे महाभागा गोप्यं यदपि मे प्रभो ! ॥
परमैश्वर्यमतुलं लभते येन तद्वद ॥३॥ भैरव उवाच
वक्ष्यामि ते महादेवि सर्वदेवि सर्वदेवविदाम्बरे ॥
अद्भुतं कवचं देव्यास्सर्वकामप्रसाधकम् ॥ ४ ॥
विशेषतः शत्रुनाशं सर्वरक्षाकरं नृणाम् ॥ सर्वारिष्ट
प्रसमनमभिचारविनाशनम् ॥ ५ ॥ सुखदम्भोगदं
चैव वशीकरणमुत्तमम् ॥ शत्रुसङ्घाः क्षयं योन्ति
भवन्ति व्याधिपीडिता ॥६॥ दुःखिनो ज्वरिणश्चैव
स्वाभीष्टप्रच्युतास्तथा । भोगदम्मोक्षदं चैव कालिका
कवचं पठेत् ॥ ७ ॥ ॐ अस्य श्रीकालीकवचस्य
भैरव ऋषि गायत्रीछन्दः श्रीकाली देवता शत्रुसङ्घ
नाशने विनियोगः ॥ ८ ॥ ध्यायेत्कालीं महामायां
त्रिनेत्राम्बहुरूपिणीम् ॥ चतुर्भुजां ललज्जिह्वां पूर्ण-
चन्द्रनिभाननाम् ॥६॥ नीलोत्पलदलप्रख्यां शत्रु-
सङ्घविदारिणीम् ॥ नरमुण्डं तथा खड्गं कमल-

श्चाम्बरं तथा ॥१०॥ बिभ्राणां रक्तवदनां दंष्ट्रालीं घोररूपिणीम् ॥ अट्टाट्टहासनिरतां सर्वदा च दिगम्बराम् ॥११॥ शवासनस्थितां देवीं मुण्डमाला विभूषिताम् ॥ इति ध्यात्वा महादेवीं ततस्तु कवचं पठेत् ॥१२॥ ॐ काली घोररूपाढ्या सर्वकामप्रदा शुभा ॥ सर्वदेवस्तुता देवी शत्रुनाशं करोतु मे ॥ ॥१३॥ ह्रीं ह्रीं ह्रीं रूपिणी चैव ह्रीं ह्रीं ह्रीं रूपिणीं तथा ॥ ह्रीं ह्रीं क्षें क्षें स्वरूपा च सर्वसत्रून्विदारयेत् ॥१४॥ श्रीं ह्रीं ऐं रूपिणीं देवीं भव बन्धविमोचनी देवी करालवदना ह्रीं रिपून् हन्तु सर्वदा ॥ १५॥ शुम्भश्च निहतो दैत्यो निशुम्भश्च महासुरः ॥ अरिनाशाय वन्दे त्वां कलिकां शङ्करप्रियम्॥१६॥ ब्राह्मी शैवी वैष्णवी च वाराही नारसिंहिका ॥ कौमार्यैन्द्री च चामुण्डा खादन्तु मम विद्विषः॥१७॥ सुरेश्वरी घोररूपा चण्डमुण्डविनाशिनी ॥ मुण्डमालावृताङ्गी च सर्वतः पातु मां सदा ॥ १८ । ह्रीं कालिके घोरदंष्ट्रे संस्तुते रुधिरप्रिये ॥ रुधिरा-

पूर्णवक्त्रे च रुधिरावृतसुस्तना ॥ १९ ॥ मम शत्रून् खादय २, हिंसय २, मारय २, भिन्द्दि २, छिन्धि २, उच्चाटय २, द्रावय २, शोषय २ स्वाहा । ॐ भञ्जय २, किरि २, किटि २, किटय २, मर्दय २, मोहय २, हर २, किटि ३ मम रिपून् ध्वंसय ३, भक्षय ३, त्रोटय ३, यातुधानी चामुण्डे सर्वजनान् राज्ञो राजपुरुषान् स्त्रियो मम वश्यान् कुरु २ तन, धन गजान् रथान् रत्नान् दिव्यां कामिनीं पुत्रान् राजश्रियं देहि २ यच्छ २ क्षीं क्षीं क्ष्रूं क्षैं क्षः स्वाहा। इत्येतत्कवचं दिव्यं कथितं शम्भुना पुरा ॥ ये पठन्ति सदा तेषां ध्रुवं नश्यन्ति शत्रवः ॥ २० ॥ वैरिणः प्रलयं यान्ति व्याधिनाशो भवन्ति हि ॥ धनहानिः पुत्रहानिर्न भवेत्तस्य सर्वदा ॥ २१ ॥ सहस्त्रपठनात्सिद्धिः कवचस्य भवेत्तथा ॥ ततः कार्याणि सिध्यन्ति यथा शङ्करभाषितम् ॥ २२ ॥ श्मशानाङ्गारमादाय चूर्णीकृत्वा प्रयत्नतः ॥ पादोदकेन संपिष्टा लिखेल्लोहशलाकया ॥ २३ ॥ भूमौ

शत्रूच हीनरूपाच् उत्तराशिरसस्तथा ।। हस्तं दत्वा तद्हृदये कवचं तु स्वयं पठेत् ।। २४ ।। शत्रोः प्राणप्रतिष्ठां तु कुर्यान्मन्त्रेण मन्त्रवित् ।। हन्यात् अस्त्रप्रहारेण शत्रुर्गच्छेद्यमालयम् ।।२५।। ज्वलद-ङ्गारतापेन भवन्ति ज्वरिता द्विषः ।। प्रोक्षणैर्वाम-पादेन दरिद्रो भवति ध्रुवम् ।। २६ ।। वैरिनाशकरं प्रोक्तं कवचं वश्यकारकम् ।। परमैश्वर्यदञ्चैव पुत्र पौत्रपौत्रादिवृद्धिदम् ।। २७ ।। प्रभातसमये चैव पूजाकाले च यत्नतः ।। सायंकाले तथा पाठात् सर्वसिद्धिर्भवेद्ध्रुवम् ।। २८ ।। शत्रुरुच्चाटनं याति देशाच्च विच्युतो भवेत् ।। पश्चात् किंकरतामेति सत्यं सत्यं न संशय ।। २९ ।। शत्रुनाशकरं देवि सर्वसम्पत्करे शुभे ।। सर्वदेवस्तुते देवि कालिके त्वां नमाम्यहम् ।। ३० ।।

इति ऐन्द्रयामल तन्त्रे वैरिहरणकालिकाकवचं समाप्तम् ।

लोग्ने मानिसलाइ दशैंको टीका लगाई दिंदा आशीर्वाद दिने मन्त्रः-

आयुर्द्रोणसुते श्रियं दशरथे शत्रुक्षयं राघवे ।
ऐश्वर्यं नहुषे गतिश्च पवने मानञ्च दुर्योधने ।।
शौर्यं शान्त नवे वलं हरधरे सत्यञ्च कुन्ती सुते ।
विज्ञानं विदुरे भवतु भवतां कीतिश्च नारायणे ।।
स्वस्त्यस्तुते कुशलमस्तु चिरायुरस्तु,
गोवाजि हस्ति धन धान्य समृद्धि रस्तु ।
ऐश्वर्य मस्तु वलमस्तु रिपुक्षयोस्तु,
संतान वृद्धि सहिता हरि भक्ति रस्तु ।।२।।

आईमाईलाई दशैमा टीका लगाइ दिदा आशीर्वाद दिने मन्त्रः-

भद्रमस्तु शिवं यास्तु महालक्ष्मीः प्रसीदतु ।
रक्षन्तु त्वां सदा देवा आशिषः सन्तु सर्वदा ।।
ॐ जयन्ती मङ्गलाकाली भद्रकाली कपालिनी ।
दुर्गाक्षमा शिव धात्री स्वाहा स्वधा नमोऽस्तुते ।१।
जयत्वं देवी चामुण्डे जय भूतार्तिहारीणि ।
जय सर्वगते देवि कालरात्रि नमोऽस्तु ते ।।

लेखक तथा सम्पादकका अन्य कृति

१. हिन्दू सदाचार पद्धति

प्रथम संस्करण २०४२
द्वितीय संस्करण २०४३
तृतीय संस्करण २०४४.
चतुर्थ संस्करण – छाप्ने व्यवस्थामा छ।

२. पुस्तकालय विज्ञानको उपादेयता

२०४५ शुभ-विजया दशमीको सुखद उपलक्ष्यमा समस्त देशवासीमा शुभ-कामना व्यक्त गर्दछु।

लेखक तथा संपादक

मुद्रक : गणपति प्रिन्टर्स प्रा.लि., कुपण्डोल, काठमाडौं,
फोन न. ५-२१८५१, २२२५३५

15-1-8